NAME OF TEACHER: MOUMITA SARKAR.

TOPIC: PROSE ROMANCES (SEM-II, SUB: SANGE, PAPER-CCA2, SEC-C)

1. गद्यसाहितस्य लक्षणं किम्?

Ψ गद्यसाहितस्य लक्षणप्रसङ्गे आचार्यदण्डिना उक्तम्- "अपादः पदसन्तानो गद्यम्" इति।

2. गद्यस्य मुख्यतः कियन्तौ भेदौ स्तः?

Ψ गद्यस्य मुख्यतः विभ्गद्वयम्- कथा आख्यायिका चेति।

3. कथाकाव्यं किम्?

Ψ कविकल्पनाश्रितं गद्यकाव्यं कथाकाव्यम् इति।

4. आख्यायिका किं भवति?

Ψ ऐतिहासिकतथ्यसमन्वितं गद्यकाव्यम् आख्यायिका इति।

5. गद्यकाव्यस्य त्रयी के कवयः सन्ति?

Ψ संस्कृतगद्यकाव्यस्य त्रयी ---- सुबन्धु-दण्डी-वाणभट्टश्च।

6. सुबन्धुरचितं गद्यकाव्यं किम् ? अस्य नायकः कः?

Ψ सुबन्धुरचितं गद्यकाव्यं वासवदत्ता इति। अस्य ग्रन्थस्य नायकः कन्दर्पकेतुः।

7. सुबन्धोः समयः कः?

Ψ सुबन्धोः समयः षष्ठशतकस्य अन्तिमभागतः सप्तमशतकस्य प्रथमभागः।

8. दशकुमारचरितम् इति ग्रन्थस्य रचनाकारः कः ?

Ψ दशकुमारचरितम् इति ग्रन्थस्य रचनाकारः महाकविदण्डी अस्ति।

9. दशकुमारचरितस्य उपजीव्यः कः अस्ति?

Ψ मगधराजस्य राजहंसस्य राज्यपुनरूद्धारविषयः दशकुमारचरितस्य मुख्यः कथावस्तु।

10.वाणभट्टविरचितं गद्यकाव्यद्वयं किमस्ति?

Ψ वाणभट्टविरचितं गद्यकाव्यद्वयम्--- हर्षचरितं कादम्वरी चेति।

11.कादम्वरी किं प्रकारकं गद्यकाव्यम्?

Ψ कादम्वरी कथाजातीयं गद्यकाव्यम्।

12.कादम्वरीकथाकाव्यस्य मुख्यरसः कः अस्ति?

Ψ कादम्वरीकथाकाव्यस्य मुख्यरसः विप्रलम्भशृङ्गारः इति।

13.अभिनवाणः इति कस्य उपाधिः आसीत्?

Ψ अभिनवाणः इति अम्विकादत्तस्य उपाधिः आसीत्।

14.दशकुमारचरिते कति उच्छासाः विद्यन्ते?

Ψ दशकुमारचरिते अष्टौ उच्छासाः विद्यन्ते।

15.संस्कृतभाषायाम् अम्विकादत्तस्य मुख्यरचना का अस्ति?

Ψ संस्कृतभाषायाम् अम्विकादत्तस्य मुख्यरचना शिवराजविजयम् इति।

16.शिवराजविजयस्य नायकः कः? प्रतिनायकश्च कः?

Ψ शिवराजविजयस्य नायकः शिववीरः शिवाजी। प्रतिनायकश्च ओरङ्गजेवः।

17.वक्रोक्तिमार्गे निपुणः आसीत् कः गद्यकाव्यकारः?

Ψ वक्रोक्तिमार्गे निपुणः आसीत् गद्यकाव्यकारः सुबन्धुः।

18.दशकुमारचरितं कीदृशं गद्यकाव्यम्?

Ψ दशकुमारचरितं आख्यायिकाजातीयं गद्यकाव्यम्।

19.दशकुमारचरितस्य मुख्यरसः कः अस्ति?

Ψ दशकुमारचरितस्य मुख्यरसः शृङ्गारः इति।

20.दण्डी कस्य उपासकः आसीत्?

Ψ दण्डी विष्णुदेवस्य उपासकः आसीत्।